International Journal of Sanskrit Research 2020; 6(2): 70-73

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 70-73
© 2020 IJSR
www.anantaajournal.com
Received: 02-01-2020
Accepted: 04-02-2020

**मौ देवनाथ**
शोधछात्री, साहित्यविभागः
राष्ट्रियसंस्कृतविद्यापिठम्, तिरुपतिः, भारत।

**Corresponding Author:**
**मौ देवनाथ**
शोधछात्री, साहित्यविभागः
राष्ट्रियसंस्कृतविद्यापिठम्, तिरुपतिः, भारत।

# उडुपिस्वामिनां संस्कृतं प्रतियोगदानम्

**मौ देवनाथ**

**प्रस्तावना**

लोकेऽस्मिन् अनेकाः प्राणिनः सन्ति। एतद्विज्ञानमभिव्यक्तीकर्तुं भाषा उपयुक्ता भवति। अतः अनेकाः भाषा समहिताः सन्ति। परं एतासां सर्वासां भाषाणांपेक्षया संस्कृतभाषा दिव्या, मधुरा रम्या, सरला, सरसा, प्राचीनमधुरसात्युत्तम नित्यनूतना च अस्ति। सनातना च भाषा संस्कृतभाषा। 'सम्' इति उपसर्गपूर्वकात् **'डुकृञ् करणे'** इति धातोः 'क्त' प्रत्यये संस्कृतशव्दः निष्पद्यते। यस्यार्थः भवति परिष्कृतः, दोषरहितः, शुद्धो वा।

**यत् परिष्कृतः तदेव संस्कृतम्**

अर्वाचीनाः याः भाषाः सन्ति ताः कदा समुत्पन्नाः इति विषये सुस्पष्टतया वक्तुं न पारयन्ति। परन्तु संस्कृतभाषायाः आविर्भावः ग्रीक्, लाटिन्, फारसी, फ्रेन्च इत्यादिनां भाषाणामपेक्षया पुर्वमेवेति विश्वस्य प्राचीनतमो ग्रन्थः ऋग्वेदानुसारेण ज्ञातुं शक्यते। एवमेव परिवर्तित आर्यभाषातः नूतनसंस्करणैः संस्कृतभाषा आविर्भूता।

मानवानां कृते स्वाभिप्रायाविष्करणाय इतरेषाम् अभिप्रायग्रहणाय च भाषा उपकरोति। प्राचीनकालादारभ्य इदानीन्तनकालपर्यन्तं संस्कृतभाषा विकसिता। तस्याः कारणं च ऋषिमुनिसन्यासीपण्डितवर्गस्वामिनां च अवदानं विशिष्ठाः वर्ततन्ते। अस्माकं देशस्य प्रत्येकस्मिन् प्रान्ते बहवः स्वामिनः विद्यन्ते। तेषु प्रायः सर्वेस्वामिनः संस्कृतं जानन्ति। अतः संस्कृतशास्त्रेऽपि विविधस्वामिनां संस्कृतं प्रति अवदानम् अनस्वीकार्यं वर्तते। तेषां स्वामिनां अप्रेक्षया उडुपिस्वामिनः अद्यापि समग्रसंस्कृतशास्त्रे सदैव परम्परागतनक्षत्ररुपेण विराजन्ते । भारतदेशस्य कर्णाटकराज्ये उडुपिनगरं विद्यते। अस्य नगरेऽष्टौ मठाः सन्ति। अष्टमठाणाम् आदिप्रवर्तकः मध्वाचार्यः वर्तते। तेषु मठेषु परम्परागततया बहवः स्वामिनः विद्यन्ते। तेषां स्वामिनां सस्कृतं प्रति अवदानम् अनस्वीकार्यं विराजते। 'उडुप' शब्दात् उडुपी इति शब्दः निष्पद्ये। अस्य शब्दस्यार्थः 'चन्द्रः' इति। अनन्तरं 'रजतपीठम्' इत्यपि अपरं एकः नाम भवति।

उडुपिक्षेत्रस्य बहवः गरिष्ठाः वरिष्ठाः स्वामिनः विद्यन्ते। तेषु विद्वत्सु केषाञ्चित् नामानि अत्र मया विलिख्यते--

**श्रीमन्मध्वाचार्यः**– भारतीयदर्शनक्षेत्रे द्वैताद्वैतविशिष्टाद्वैतदर्शनानि प्रस्थानत्रयमवम्ब्य प्रवृत्तप्रमुखतत्त्वशास्त्रसम्प्रदायास्सन्ताः जगति विराजन्ते। एतेषु त्रिषु दर्शनेषु द्वैतदर्शनमत्यन्तमर्वाचीनम्। द्वैतदर्शनस्य प्रचारार्थं प्रसिध्यर्थञ्च श्रीमन्मध्वाचार्याः अनेकान् ग्रन्थान् व्यरचयन्।

डा. बि.एन.के. शर्मामहाभागेन प्रोक्तं "हिस्टरी आफ् द्वैतवेदान्त" नामकग्रन्थे प्रायः ११९९ इत्यतः १३२० एतावत्पर्यन्तं मध्वाचार्याः जीवन्तः आसन्नित्यसूचीतम्। मध्वाचार्याः बाल्यादेव इहलोकव्यापारेषु विरक्ताः भूत्वा आध्यात्मिकनिष्ठया उडुपिक्षेत्रस्य अनन्तेश्वरस्वामिनां सन्निधौ अच्युतप्रेक्षतीर्थश्रीपादेभ्यः तुरीयाश्रमं प्राप्य आनन्दतीर्थः, पूर्णप्रज्ञः, दशप्रमतिः, सुखतीर्थत्यादिनामान्तरैः लोकप्रसिद्धं भवति।

आनन्दतीर्थः इति नाम्ना उडुपिक्षेत्रपरिसरेषु विद्यमानाच्युतप्रेक्षशिष्याः भारते सर्वत्र द्वैततत्वस्य प्रचारेच्छया कृतसङ्कल्पनमकुर्वन्। बहुदिवसपर्यन्तं भिन्नभिन्नस्थाने देशवासिषु वादं वादं कुर्वन्तः शिष्येभ्यः परमात्मनः तत्वमपि बोधयन्तः ततःपरं द्वैतसिद्धान्तस्य प्रतिष्ठां वर्धितवन्तः।

आचार्याणां श्रेष्ठतमसिद्धान्तः द्वैतसिद्धान्तः। तस्मिन् सिद्धान्ते विद्यमानतत्वानां प्रतिपादनं तेषु तत्त्वेषु प्रकाशमानपारमार्थिकज्ञानेच्छया अनतिकाले एव अनेके अभेदप्रतिपादकाः दार्शनिकाः मतानन्तरं प्राप्य आनन्दतीर्थानां शिष्यत्वं स्वीकृतवन्तः। ततो उडुपिक्षेत्रे सुन्दरमयकृष्णप्रतिमायाः प्रतिस्थापणं कृत्वा क्षेत्रस्यास्य सुप्रसिद्धयात्रास्थलमभवत्। अनन्तरं श्रीमद्भागवतस्य च तात्पर्यनिर्णायकत्वेन भागवततात्पर्यनिर्णयः महाभारततात्पर्यनिर्णयग्रन्थौ तथैव मध्वाचार्याः सप्तत्रिंशत् ग्रन्थान् विरचिताः। श्रीमदाचार्याणां ग्रन्थाणां विषये श्रीव्यासराजतीर्थैः विरचितग्रन्थमालिकास्तोत्रं तथा श्रायदुपत्याचार्यैः कृतपूर्णप्रज्ञग्रन्थमालिकास्तुतिरपि प्रमानतया स्वीकर्तुं शक्यते।

आनन्दतीर्थस्वामिभिः रचितग्रन्थान् सर्वान् मिलित्वा सर्वमूले नामान्तरेणापि कथयन्ति। ते सर्वमूलग्रन्थाः चतुर्षु विभागेषु भवन्ति। यद्यथा – १. प्रस्थानग्रन्थाः, २. प्रकरणग्रन्थाः, ३. इतिहासग्रन्थाः, ४. स्त्रोत्रग्रन्थाः चेति। तेषु गीताभाष्यम्, गीतातात्पर्यम्, ब्रह्मसूत्रभाष्यम्, अणुभाष्यम्, न्यायविवरणम्, अणुव्याख्यानम्, ईशकेनकठादिदशोपनिषदां भाष्यमित्येतान् ग्रन्थान् मिलित्वा प्रस्थानग्रन्थाः भवन्ति। द्वैतसिद्धान्तघटकप्रमुखप्रमेयान् बोधयन्तः विष्णुतत्त्वनिर्णयः, तत्त्वसंख्यानं, तत्त्वविवेकः, तत्त्वोद्योतः, प्रमाणलक्षणं, प्रपञ्चमिथ्यात्वानुमानखण्डनं, मायावादखण्डनं, उपाधिखण्डनं, कर्मनिर्णयेत्यादिग्रन्थाः प्रकारणग्रन्थाः भवन्ति। अतिविस्तृतभागवतपुराणस्य संक्षेपतया रचितव्याख्या भागवततात्पर्यं रामायणे भारते च सामान्यजनानां कृते आगतसंशयनिवारणार्थं रचितमहाभारततात्पर्यनिर्णयः, आध्यात्मिक्-प्रपञ्चस्य अर्थनिरुपणदृष्ट्या च रचित ऋग्वेदप्रथमद्वितीयतृतीयाध्यायानां व्याख्यानरुपा ऋग्भाष्यमित्यादीनामितिहासग्रन्थाः भवन्ति। यमकश्लेषाद्यलङ्कारप्रधानं यमकभारतम्, द्वादशस्तोत्रम, आचार्याणामाराध्यदैवस्य स्तुतिः कृष्णमृतमहार्णवं, कृष्णमूर्तेः प्रतिष्ठाविधिः तथापूजाविधिविधानमधिगन्तुं कृतः तन्त्रसारः प्रतिनियतं धर्मस्याङ्गिकारेण अवश्यामाचरणीयकर्मणां सङ्ग्रहरूपेणकृतसदाचारस्मृतिः यतीनां नित्यनैमित्तिकविधिविरणरूपेण लिखित यतिप्रणवकल्पेत्यादिभिः स्रोत्रग्रन्थाः भवन्ति।

**श्रीमज्जयतीर्थः (१३३५ – ८८, कार्यम्)**

वैष्णवसमाजे सर्वेषां जनानां जिह्वाग्रे नरीनृत्यति एतेषां नाम। निखिलं आर्यावर्तं श्रीमध्वाचार्याणां ग्रन्थराशिं निजटीकाभिः विभूषयितुं अवतीर्णाः आसन्। एकस्मिन्दिवसे भामरथीं नदीं तरीतुकामास्तृषाक्रान्ता अश्वारूढैः सैनिकान् नुसृत्य अश्वारूढा एव मुखं नीरसमीपं

प्रापय्योदकं पपुः। तत्तीरे स्थिताः श्रीमन्तोऽक्षोभ्यतीर्थाः कृतिमिमां दृष्ट्वाऽयमेव पुरुषः स्वप्ने निर्दिष्टो यदधीनं वैष्णवसमाजस्य कार्यमिति भगवत आज्ञेति निधाय किं **पशुः पूर्वदेहे** इत्यवोचन्। तच्छब्दश्रवणादेव धोण्डोरायः पूर्वजन्मानुभूतं स्मृतवान्। अनन्तरं स्वशिष्यमेकं तत् समीपं प्रेषयामासुः। शिष्येन सहागतमवलोक्य परां तुष्टिं प्राप्ताः श्रीमदक्षोभ्यतीर्थाः परेशनिदेरर्शने भवदधीनं वैष्णवसाम्राज्यं कर्तुकामोऽहं तत्स्वीकार्यं भवतेत्यूचुः। श्रीमतामक्षोभ्यतीर्थचरणानामनुग्रहेण सकलां विद्यां अचिरादेवात्मसात्कृत्वा महान्तः ग्रन्थान् विरचिताः। तदुक्तमेव स्वाध्यायनविषये –

**अक्षोभ्यतीर्थगुरुणा शुकवच्छिक्षितस्य मे।**
**वचोभिरमृप्रायैः प्रीयन्तां सततं बुधाः॥इति (प्रमेयदीपिका)**

श्रीमज्जयतीर्थस्य स्वतन्त्रग्रन्थाः। यथा- १. प्रमाणपद्धतिः, २. बादावली, ३. शतापराधस्तोत्रम्, ४. पद्यमाला, ५. अध्यात्मामृततरङ्गिणी। अनन्तरञ्च टीकाग्रन्थाः यथा – तत्त्वप्रकाशिका, श्रीमत्र्यायसुधा, न्यायकल्पतरुः, प्रमेयदीपिका, न्यायदीपिका, तत्त्वसङ्ख्यानम्, प्रमाणलक्षणम्, तत्त्वनिर्णयः, तत्त्वविवेकः.उपाधिखण्डनं, मायावादखण्डनं, मिथ्यात्वानुमानखण्डनं, कर्मनिर्णयः, ऋग्भाष्यमित्यादिभिश्च।

**श्रीराघवेन्द्रतीर्थः**

सनातनधर्मस्य मध्वमतसंन्यासिषु प्रमुखाः भवन्ति। मध्वाचार्याणां सकात्भुत्वा मध्वमतं मध्वसिद्धान्तं प्रतिपादिताः। कश्चनजनाः कथयन्ति प्रह्लादस्य तृतीयावतारः अस्ति श्रीराघवेन्द्रतीर्थः इति। श्रीपादाः बहुन् ग्रन्थान् विरचय्य श्रीमदानन्दतीर्थभगवत्पादानां श्रीमट्टीकाकृत्पादानां च महतीं सेवां अकुर्वन्।एषां टिप्पण्यादिग्रन्थाः प्रस्थानत्रयेऽपि विद्यन्ते। एते ग्रन्थाः सरलाः सुबोधाः सूपयुक्तार्थबोधकाः रुचिरार्थप्रतिपादकाः, टीकाभावं सम्यक् प्रकटीचरीकरन्। सर्वेषां बिदुषां समेषां व्युत्पन्नविद्यार्थिनां अत्युपयुक्ताः।तस्य विरचितग्रन्थाः यथा- गीताविवृतिः,गीतातात्पर्यन्यायदीपिकाभावदीपः इत्यादिभिः। राघवेन्द्रस्वामिनां वादावलीटिप्पणी भावदीपिका इति। तैरेव टिप्पण्यन्ते एवमुक्तमस्ति –

**सुधीन्द्रगुरुपादानां शिष्येण श्रीशतुष्टये।**
**राघवेन्द्रेण यतीना कृतेयं भावदीपिका॥**

**श्रीव्यासतीर्थः**

श्रीब्रह्मण्यतीर्थैः प्राप्तप्रणवोपदेशः श्रीश्रीपादाराजसकाशादधिगतसर्वविद्यः श्रीव्यासराजजयतिः क्रैस्तवीयकालमानानुसारं षोडशतमकस्यादिमेषु वर्षेषु (1478-1538 A.C) कर्णाटकदेशभागमिममलमकार्षीत्। योऽयं स्वतः सत्वयुतस्यापि मध्वसिद्धान्तस्य सुदृढतामप्रधृष्यतां परिरक्षां च कामयमान- समर्थसेनानी इव परपक्षं व्युदस्य सिद्धान्तं परितं अभेद्यं दुर्गम् अनायासेनातिक्रान्तः। विद्वत्तल्लजैः प्रकाण्डपण्डितमण्डलैरप्यनुगीयमानयशस्कैः पक्षधरमिश्रवसवपण्डितप्रभृतिभिः प्रतिपक्षिभिरपि सशिरःकम्पमुलालितमाहात्म्यैरेतैर्व्यासतीर्थभिक्षुभिर्लो कोपचिकीर्षुभिर्नव ग्रन्था व्यरचिषत। तेषु सत्तर्कविलासाख्यो ग्रन्थः सम्प्रत्यपि नोपलभ्यते। उपलभ्यमाना एते अष्टौ ग्रन्थाः यथा – न्यायामृतम्, तर्कताण्डवम्, तात्पर्यचन्द्रिका, भेदोज्जीवनम्, मायावादखण्डनमन्दारमञ्जरी, उपाधिखण्डनमन्दारमञ्जरी, मिथ्यात्वानुमानखण्डमन्दारमञ्जरी, तत्वविवेकमन्दारमञ्जरी इत्यादि।

**श्रीवादिराजतीर्थः**

वादिराजः मध्वमतानुयायी वेदान्ती पण्डितश्चेति। श्रीसोदेमठस्य अनुसंगृहीतात् मध्वाचार्यस्य स्थापितेषु अष्ठमठेसु सोदेमठः अन्यतमः भवति। व्यासराजस्यानन्तरकालिकः वादिराजः भवति। व्यासराजस्य शिष्यः वादिराजः इति पुरन्दरदासगीतानुसारेण। विद्यानिधितीर्थस्य वागीशतीर्थस्य च बहूणां ग्रन्थानां अध्ययन कृतवान्। सः तीर्थ न केवलं संस्कृतशास्त्रेषु परन्तु संगीतशास्त्रेपि च प्रवीणः आसीत्। मुख्यतया द्वैतसिद्धान्तः इति हेतोः तन्

मतप्रतिपादकाः बहवः ग्रन्थाः संस्कृतभाषायां तेन विरचिताः। यथा – स्वतन्त्रग्रन्थाः – युक्तिमल्लिका, न्यायरत्नावला, चक्रस्तुतिः, स्वतन्त्रकाव्यानिश्चेति रुक्मिणीशविजयः, सरस भारती विलासःतीर्थप्रबन्धः, कविकदम्बकण्ठभूषा इत्यादिभिः।

**श्रीसुमतीन्द्रतीर्थः**

श्रीमन्मध्वाचार्याणां मूलमहापिठस्थाने श्रीगुरुराजानन्तरं सुप्रसिद्धाः यतिश्रेष्ठाः श्रीसुमतान्द्रतीर्थाः। तेषां कालः क्री.श. १३९२ – १७२२ ए.डि. आसीत्। सः स्वपितृपादानां सन्निधौ शास्त्राणि अधीत्य अनन्तरं श्रीराघवेन्द्रस्वामिनां पदतले उपविश्य शास्त्राणि अधीत्य अनन्तरं श्रीराघवेन्द्रतीर्थविरचितग्रन्थाः श्रीसुमतीन्द्रतीर्थानां कृते इत्येव उक्तवन्तः। श्रीसुमतीन्द्रतीर्थाः स्वलिखितानां अनेकग्रन्थानां भावरत्नकोश इति नानकरणकुर्वन् इत्ययं विषयः प्रथितः।एतैः महानुभावैः चत्वारिंशदधिकग्रन्था विरचिताः। एतेषु ग्रन्थेषु ऋग्भाष्यटीकाभावरत्नकोशः तेषां वेदविषये विद्यमानमगाधं वैदुष्यं प्रकटीकरोति। तथैव न्यानसुधावाक्यार्थरत्नकोशः, मन्त्ररत्नकोशः, तत्त्वप्रकाशिकाभावरत्नकोशः तथा चन्दिकाटिप्पणी इत्यादयः ग्रन्थाः तेषां सूत्रप्रस्थानविषये विद्यमानं पाण्डितप्रकर्षं द्योतयन्ति। एवञ्च क्रमेण श्रीसुमतीन्द्रतीर्थानां भावरत्नकोशकारा इत्यपरं नामधेयं सार्थकं भवति।

**श्रीरघुवर्यतीर्थः**

श्रीरघुवर्याः फलिमारुमठगुरुपरम्परायां स्वकीयवैदुष्यविलासेन, श्रीमन्मध्वमतप्रसारतत्परतया, सदाचारानुष्ठानसम्प्राप्ततपोबलेन च विभूषिताः क्रिस्तीयसप्तदशशतके श्रीपादपट्टं अलञ्चक्रुः। अत्र कनिष्ठाः रघुवर्यतीर्थाः। क्रिस्तीय १६७० तमवर्षपर्यन्तं एते श्रीपादाः यतिपीठं भूषयामासु। तस्य गुरवः श्रीरामभद्रतीर्थाः आसीन्। सः सक्वीषोडषवर्ष एव चतुशशास्त्रपाण्डित्यमाधिगम्यविंशतितम एव बर्षे प्राज्ञजनमोददायिनं वृत्तरत्नाकरोदाहरणरूपं रामकथानकं रघुनाथविजयाख्यां व्यरचयन्।

**सहायकग्रन्थसूची** –


1. मध्वाचार्यविरचितं – सुमध्वविजयः द्वैतवेदान्ताध्ययनसंशोधन प्रतिष्ठानम्, वेङ्गलूरु
2. श्रीजयतीर्थविरचितं – वादावली, द्‌वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठानम्.वेङ्गलूरु ,
3. श्री आनन्दतीर्थभगवत्पादाचार्यविरचितं – सर्वमूलग्रन्थाः १९९३, द्‌वैतवेदान्तप्रतिष्ठानम्,
4. श्रीव्यासतीर्थविरचितं – भेदोज्जीवनम्, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु, १८.२००७
5. डा.बि.एन.के.शर्मा विरचितं – हिस्टरी आफ् द्वैतवेदान्तः
6. रघुवर्यतीर्थस्य विरचितं – रघुनाथविजयम् ORIENTAL RESEARCH INSTITUTE MYSORE, 1985
7. वादिराजगुरुवचरितामृते वादिराजगुणरत्नमाला- श्रीवादिराजः
8. श्रीसुमतीन्द्रतीर्थविरचितं – मन्त्ररत्नकोशः, डा.व्यासनकेरे प्रभञ्जनाचार्यः ऐतरेय प्रकाशन व्यासनकेरे, २००६